बुध इत्यकरोन्नाम प्राशान्राज्यञ्च भूतले ॥
अभिषिक्तं ततः कृत्वा प्रधानमकरोद्दिशः ।
ग्रहसाम्यं प्रदायाथ ब्रह्मा ब्रह्मर्षिसंयुतः ॥
पश्यतां सर्व्वभूतानां तत्रैवान्तरधीयत ।
इलोदरे च धर्म्मिष्ठं बुधः पुत्रमजीजनत् ॥"

अन्यत् सर्व्वमाख्यानमेकमेव ॥ * ॥ अस्य वर्णः दूर्व्वाश्यामः । स च उत्तरदिङ्नपुंसकशूद्रजात्यथर्व्ववेदरजोगुणमिश्रितरसमिथुनराशिमरकतमणिमगधदेशानामधिपतिः । अस्य मित्रं आदित्यः शुक्रश्च । अस्य शत्रुः शशी । अस्य राशिभोगः अष्टादश दिनानि । इति ज्योतिस्तत्त्वम् ॥ * ॥ स तु मगधदेशोद्भवः । अत्रिवंशजातः । द्व्यङ्गुलदीर्घः । पीतवर्णः । वैश्यजातिः । चतुर्भुजः । वामोर्द्ध्वक्रमतश्चर्म्मवरखड्गगदाधारी । उत्तरास्यः । सिंहवाहनः । सौम्यः । पीतवस्त्रः । अस्याधिदेवता नारायणः । प्रत्यधिदेवता विष्णुः । धनिष्ठानक्षत्रयुक्तद्वादश्यां जातः । इति ग्रहयज्ञतत्त्वम् ॥ * ॥ स च ग्रामचारी । शुभग्रहः । नीलवर्णः । सुवर्णद्रव्यस्वामी । वर्त्तुलाकृतिः । शिशुः । इष्टकागृहसञ्चारी । वातपित्तकफात्मकः । क्लीवग्रहः । प्रातःकाले प्रबलः । पक्षिस्वामी । सकलरसप्रियश्च । इति ज्योतिषम् । अस्य वारे जातफलं यथा,—

"गुणी गुणज्ञः कुशलः क्रियादौ
विलासशाली मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

सूर्य्यवंशीयराजविशेषः । यथा,—
"तस्मात् कृतिरथस्तस्य देवामीढ़स्ततो बुधः ।
बुधाच्च विबुधश्चैव तस्मान्महाधृतिस्ततः ॥"

इत्यग्निपुराणम् ॥

( वेगवतो राज्ञः पुत्रः । यथा, भागवते । ९ । २ । ३० ।
"ततसुतः केवलस्तस्मात् बन्धुमान् वेगवांस्ततः ।
बुधस्तस्याभवद् यस्य तृणबिन्दुर्महीपतिः ॥")

बुधचक्रं, क्ली ( बुधस्य ग्रहविशेषस्य चक्रम् । ) बुधग्रहस्य स्वसञ्चाराद्द्वादशदिनोत्तरराशिस्वसञ्चारनक्षत्रावधिसप्तविंशतिनक्षत्रघटितनरशुभाशुभज्ञानार्थनराकारचक्रम् । यथा,—
"भोगो मुखेकमथ मूर्द्ध्नि चतुर्षु रोगः
षट्पाणिभे सुखहृतं सुखदं श्रुतेऽत्र ।
दुःखं पदाब्धिसुयशो हृदि सप्तराज्यं
नाभीन्दुभे द्विभगलेति धनं बुधस्य ॥"

इति समयामृतम् ॥

बुधतातः, पुं, (बुधस्य ग्रहविशेषस्य तातः पिता ।) चन्द्रः । इति शब्दचन्द्रिका ॥

बुधरत्नं, क्ली, ( बुधप्रियं रत्नम् । शाकपार्थिवादित्वात् समासः । ) मरकतमणिः । इति राजनिर्घण्टः ॥

बुधवारः, पुं, (बुधस्य वारः ।) बुधग्रहस्य वासरः । यथा,—
"यैः कृता श्रावणे मासि अष्टमी रोहिणी-
युता ।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥"

इति तिथ्यादितत्त्वम् ॥

( अस्मिन् जातफलं यथा, कोष्ठीप्रदीपे ।
"गुणी गुणज्ञः कुशलः क्रियादौ
विलासशीलो मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥ )

बुधसानुः, पुं, पर्णम् । यज्ञपुरुषः । इति संक्षिप्तसारोणादिवृत्तिः ॥

बुधसुतः, पुं, ( बुधस्य सुतः पुत्रः । ) पुरूरवाः । इति पुराणम् ॥ ( यदुक्तं हरिवंशे । २६ । १ ।
"बुधस्य तु महाराज ! विद्वान् पुत्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥"
अयं हि इलागर्भसंभूतः ॥ बुधस्य बुद्धदेवस्य सुतः पुत्र इति विग्रहे । बुद्धपुत्रो राहुलः । स तु यशोधराया गर्भसम्भूतः । )

बुधा, स्त्री, ( बोधयति रोगिणं वा । बुध् + "इगुपधेति ।" ३ । १ । १३५ । इति कस्ततष्टाप् । ) जटामांसी । इति शब्दचन्द्रिका ॥ (गुणादिकमस्या जटामांसीशब्दे ज्ञातव्यम् ॥ )

बुधानः, पुं, ( बोधयति बुध्यते वा । बुध बोधने + युधिबुधिदृशः किच्च ।" उणा० २ । ९० । इति आनच् किच्च ।) गुरुः । विज्ञः । इति मेदिनी । ने, २६ ॥ ब्रह्मवादी । प्रियवादी । इत्युणादिकोषः ॥ कविः । इति जटाधरः ॥

बुधाष्टमी, स्त्री, ( बुधवारयुता अष्टमी । शाकपार्थिवादित्वात् समासः ।
"अष्टमीबुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥"

इति वचनादस्यास्तथात्वम् ।)

व्रतविशेषः यथा । बुधाष्टमीव्रतं चैत्रपौषहरिशयनादीतरकाले कर्त्तव्यम् । यदाह राजमार्त्तण्डः ।
"पतङ्गे मकरे याते देवे जाग्रति माधवे ।
बुधाष्टमीं प्रकुर्व्वीत वर्जयित्वा तु चैत्रकम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मधौ तथा ।
बुधाष्टमीं न कुर्व्वीत कृता हन्ति पुराकृतम् ॥"
एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यमिति । यथा स्मृतिः ।
"मीने धनुषि देवेशे सुप्तेऽसुहृद्दिने तथा ।
बुधाष्टमीं न कुर्व्वीत पूर्व्वविद्धामपि क्वचित् ॥"

इति व्रतकालविवेकः ॥ * ॥

अपि च ।
"अष्टमी बुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥
तस्यां नियमकर्त्तारो न स्युर्दुर्गतिभाजनाः ।
तण्डुलस्याष्टमुष्टीनां वर्जयित्वाङ्गुलीद्वयम् ॥
भक्तं सद्भक्तिश्रद्धाभ्यां कामनायुक्तमानवः ।
आम्रपत्रपुटे कृत्वा यो भुङ्क्ते कुशवेष्टिते ॥
कलम्बिकाम्लिकोपेतं काम्यं तस्य फलं भवेत् ।
बुधं यथोपचारेण पूजयित्वा जलाशये ॥
शक्तितो दक्षिणां दद्यात् कर्करीं तण्डुलान्विताम् ।
बुं बुधायेति बीजाद्यैः स्वार्णैर्वा कमलादिके ॥
बाणचापधरं श्यामं दले चाङ्गानि मध्यतः ।
बुधाष्टमीकथा पुण्या श्रोतव्या व्रतिभिर्ध्रुवम् ॥ * ॥
पुरे पाटलिपुत्राख्ये वीरो नाम द्विजोत्तमः ।
रम्भा भार्य्या च तस्यासीत् कौशिकः पुत्र
उत्तमः ॥
दुहिता विजया नाम धनपालो वृषोऽभवत् ।
गृहीत्वा कौशिकस्तञ्च क्रीडां गङ्गागतोऽरमत् ॥
गोपालकैर्वृषश्चौरैः क्रीडन्नपहृतो बलात् ।
गङ्गातः स च उत्थाय वनं बभ्राम दुःखितः ॥
जलार्थं विजया चागात् भ्राता सार्द्धञ्च साप्य-
गात् ।
पिपासितो मृणालार्थी आगतोऽथ सरोवरम् ।
दिव्यस्त्रीणाञ्च पूजादि दृष्ट्वा चाप्यथ विस्मितः ॥
स च गत्वा ययाचेऽन्नं सानुजोऽहं बुभुक्षितः ।
स्त्रियोऽब्रुवन् व्रतं कर्त्तुं दास्यामश्च कुरु व्रतम् ।
पक्षयंमन्नपानार्थं पूजयामासतुर्बुधम् ।
पुटकद्वयं गृहीत्वान्नं बुभुजाते प्रदत्तकम् ॥
स्त्रियो गता गतौ तौ तु धनपालमपश्यताम् ।
चौरैर्हृतं गृहीत्वाथ प्रदोषे प्राप्तवान् गृहम् ॥
वीरश्च दुःखितं गत्वा रात्रौ सुप्त्वा यथासुखम् ।
लब्धञ्च त्वरितं दृष्ट्वा कस्य देया सुता मया ।
यमायेत्यब्रवीद्दुःखात् स चायाद्व्रतसत्-
फलात् ॥
स्वर्गं गतौ च पितरौ व्रतं राध्याय कौशिकः ।
चक्रेऽयोध्यामहाराज्यं दत्त्वा च भगिनीं यमे ॥
यमोऽपि विजयामाह गृहस्था त्वं पुरान्तरम् ।
नोद्घाटयान्यत्र गते यमे सा न तथाकरोत् ॥
अपश्यद्भ्रातरं स्वां सा यामिकां पापयातनाम् ।
अथोद्विग्ना कौशिकाय आचचाक्षा विमुक्ति-
दम् ।
व्रतं चक्रे ततो मुक्ता माता तस्माच्चरद्व्रतम् ॥"
इति गारुड़े बुधाष्टम्यादि १३३ अध्यायः ॥ * ॥

विस्तरस्तु ब्रह्मपुराणोक्तबुधाष्टमीव्रतपद्धतौ द्रष्टव्यः ॥

बुधितं, त्रि, ( बुध्यते स्म । सेट् बुध् + क्त । ) बुद्धम् । ज्ञातम् । इत्यमरः । ३ । २ । १०८ ॥

बुधिलः, त्रि, ( बुध्यते यः । बुध् + किलच् । ) विद्वान् । इत्युणादिकोषः ॥

बुध्नः, पुं, ( बध्नातीति । बन्धबन्धने "बन्धेर्ब्रधिबधी च ।" उणा० ३ । ५ । इति नक् बुधादेशश्च ।) वृक्षमूलम् । इत्यमरः । २ । ४ । १२ ॥ ( मूलदेशः । अग्रभागः । यथा, अथर्व्ववेदे । २ । १४ । ४ ।
"गृहस्य बुध्न आसीनास्ता इन्द्रो वज्रेणाधि-
तिष्ठतु ।")

शिवः । यथा,—
"निवेश्य बुध्नं चरणं स्मितानना
गुरुं समारोढ़ुमथोपचक्रमुः ।"
इति हरविलासे राजशेखरः । इति भरतः ॥